श्रीः

श्रीमन्महाकवि कालीदासप्रणीतः

श्रुतबोधः

खिस्ते इत्युपाख्य मुकुन्दशास्त्रि कृत
'परीक्षोपकारिणी' टीका तथा
भाषानुवाद सहितः

स एव

श्रीकाशीप्रसाद भार्गवेण,

स्वकीये

भार्गवभूषण यन्त्रालये मुद्रयित्वा
प्रकाशितः।

मू. ।)

॥ श्रीः ॥

श्रीमन्महाकविकालिदासप्रणीतः

श्रुतबोधः

'खिस्ते' इत्युपाख्य मुकुन्दशास्त्रिकृत
'परीक्षोपकारिणी' नामकटीका
तथा भाषानुवादसहितः।

स एव

भार्गव पुस्तकालयाध्यक्षेण

स्वकीये

भार्गवभूषण यंत्रालये त्रिलोचने, काश्यां

मुद्रयित्वा प्रकाशितः।

॥ श्रीगणेशाय नमः ॥

श्रुतबोधः

परीक्षोपकारिणी टीका-

तथा

भाषाऽनुवादसहितः ।

ग्रन्थप्रतिज्ञा ।

छन्दसां लक्षणं येन श्रुतमात्रेण बुध्यते ।
तमहं सम्प्रवक्ष्यामि श्रुतबोधमविस्तरम् ॥ १ ॥

अन्वयः–अहं अविस्तरं तं श्रुतबोधं सम्प्रवक्ष्यामि, येन श्रुतमात्रेण छन्दसां लक्षणं बुध्यते ।

अर्थः–अहं–कालिदासः, न विद्यते विस्तरः–विस्तृतिः निष्प्रयोजनप्रतिपादनमिति यावत् यस्मिन् तमविस्तरमुपयुक्तगर्भमिति भावः । तं–महाकविकृतत्वेन प्रसिद्धम्, श्रुतबोध–तदाख्यं छन्दो ग्रन्थं, सम्प्रवक्ष्यामि–निरूपयिष्यामि ।

येन–ग्रन्थेन, श्रुतमात्रेण, श्रुतमाकर्णितमेव श्रुतमात्र तेन–कर्णगोचरेणैव, छन्दसां–आर्यानुष्टुबादीनां, लक्षणं–वर्णमात्राणां स्वरूपं, बुद्ध्यते–अवगम्यते ॥ १ ॥

भाषा–जिस श्रुतबोध के सुनने मात्र से छंदों का लक्षण जाना जाताहै उस श्रुतबोध नामक ग्रन्थ को संक्षेप से मैं (कालिदास) कहता हूं ॥ १ ॥

परिभाषा ।

संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रम् ।
विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन ॥ २ ॥

अन्वयः–संयुक्ताद्यं, दीर्घं, सानुस्वारं, विसर्गसंमिश्रं, अक्षरं गुरु, विज्ञेयम्, पादान्तस्थं (अक्षरम्) विकल्पेन (गुरु विज्ञेयम्)

अर्थः–संयुक्तस्य–संयोगीभूतस्याद्यं–आदिभवं, दीर्घं–द्विमात्रकम्, सानुस्वारं–अनुस्वारेण सह वर्तमानम्, विसर्गसंमिश्रं–विसर्गेण सह वर्तमानम्, अक्षरं–वर्णः, गुरु–अलघु, विज्ञेयम्–बोध्यम्, पादान्तस्थं–चरणान्तस्थितं, विकल्पेन–भावाभावेन, गुरुलघु बोध्यम्। पादान्ते गुरुरपि लघुःस्यात्कुत्रचिल्लघुरपि गुरुः स्यात् । तथा चोक्तं ग्रन्थान्तरे–वा पादान्ते त्वसौ वक्रो ज्ञेयोऽन्यो मात्रको लघुः ॥ २ ॥

भाषा-संयुक्त अक्षर से पूर्व का अक्षर दीर्घ होता है और अनुस्वार तथा विसर्ग संयुक्त अक्षर भी गुरु जानना चाहिये। तथा चरण के अंत में भी लघु अक्षर को विकल्प करके गुरु जानना चाहिये ॥ २ ॥

एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रश्च प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम् ॥

गणलक्षणम्।

आदिमध्यावसानेषु भजसा यान्ति गौरवम्।
यरता लाघवं यान्ति मनौ तु गुरुलाघवम् ॥३॥

अन्वयः—भजसा, आदिमध्यावसानेषु गौरवं यान्ति, यरताः (आदिमध्यावसानेषु) लाघवं यान्ति, मनौ तु (आदिमध्यावसानेषु) गुरु लाघवं यातः ॥ ३ ॥

अर्थः—भजसाः—भगण जगण सगणाः, आदिमध्यावसानेषु, आदिश्च मध्यं च अवसानं च तानि तेषु—प्रथम मध्यम समाप्तिषु, गौरवं—गुरुतां यान्ति—गच्छन्ति। तथा हि—आदिगुरुर्भगणः (ऽ।।) मध्य गुरुर्जगणः (।ऽ।) अन्त्यगुरुः सगणः (।।ऽ) यरताः—यगणरगणतगणाः (आदिमध्यावसानेषु) लाघवं—लघुतां यान्ति, तथाहि—आदिलघुर्यगण-

(ISS) मध्यलघूरगणः (SIS) अन्त्यलघुस्तगणः (SSI) तु-पुनः मनौ-मगणनगणौ (आदिमध्यावसानेषु) गुरु लाघवं-गुरुतां लघुतां च यातः, तथा च सर्वगुरुर्मगणः (SSS) सर्वलघुर्नगणः [III] भवतीति ॥ ३ ॥

भाषा-आदि मध्य और अंतमें भगण जगण और सगण दीर्घ होते हैं, और यगण रगण तगण ये आदि मध्य और अन्तमे ह्रस्व होते हैं, तथा मगण और नगण यथा क्रम से गुरू और लघु होते हैं।

आर्या छन्दः ।

यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥४॥

अन्वयः-यस्याः प्रथमे तथा तृतीये अपि पादे द्वादश, द्वितीये अष्टादश चतुर्थके पञ्चदश मात्राः (स्युः)सा आर्या (भवति)

अर्थः-यस्यां-वृत्ते:,प्रथमे पादे-प्रथमे चरणे,द्वादश मात्राः स्युः, तथात - नैव प्रकारेण तृतीयेऽपि तत्संख्यक चरणेऽपि द्वादश मात्रा स्युः, द्वितीये पादे- द्वितीये चरणे अष्टादश.

मात्राः, चतुर्थके--तुर्ये, पञ्चदश मात्रा स्युः, सा-वृत्तिः, आर्या नाम। आर्याचरणेषु क्रमान्मात्रा १२-१८-१२-१५ ॥४॥

भाषा-जिस श्लोक के प्रथम तथा तृतीय चरणमें १२ मात्रा हों, द्वितीय में १८ और चतुर्थ में १५ मात्रा हों। उसको आर्या छन्द कहते हैं ॥ ४ ॥

गीतिः (आर्या)

आर्यापूर्वार्धसमं द्वितीयमपि भवति यत्र हंसगते।
छन्दोविदस्तदानीं गीतिंताममृतवाणि भाषन्ते॥५॥

अन्वयः-हे हंसगते, यत्र द्वितोयमपि आर्यापूर्वार्धसमं भवति, हे अमृतवाणि, छन्दोविदः तदानीं तां गीतिं भाषन्ते ॥५॥

अर्थः-हे हंसगते! हंसस्येव गतिर्गमनं यस्यास्तत्सम्बुद्धौ, यत्र-वृत्तौ, आर्याया पूर्वार्धेन समं,-तुल्यं, द्वितीयमपि-उत्तरार्धमपि, भवति-जायते, अमृतमिव-पीयूषमिव वाणी-वाक् यस्यास्तत्सम्बुद्धौ हे अमृतवाणि, छन्दोविदः-छन्दःशास्त्रज्ञाः, तदानीं-तदा, तां गीतिं-तन्नामकं छन्दः, भाषन्ते-कथयन्ति। गीतिचरणेषु क्रमान्मात्राः १२-१८-१२-१८॥५॥

भाषा–हे हंसके सदृश चालवाली ! जिस श्लोकका पूर्वार्द्ध तथा उत्तरार्द्ध आर्या के पूर्वार्द्ध के समान होता है हे अमृतभाषिणि ! छन्दः शास्त्र के जाननेवाले उसे गीति छन्द कहते हैं अर्थात् जिस श्लोक के प्रथम तृतीय चरण में बारह व द्वितीय चतुर्थ चरण में अठारह मात्रा हों उसे गीति छन्द जानना ॥५॥

उपगीति (आर्या)

आर्योत्तरार्धतुल्यं प्रथमार्द्धमपि प्रयुक्तं चेत् ।
कामिनि तामुपगीतिं प्रकाशयन्ते महाकवयः ॥६॥

अन्वयः–हे कामिनि, चेत प्रथमार्धम् अपि, आर्योत्तरार्धतुल्यं प्रयुक्तम्, महाकवयः ताम्, उपगीतिं प्रकाशयन्ते, ॥ ६ ॥

अर्थः–हे कामिनि–कामुके, चेत्–यदि, प्रथमार्धमपि–प्रथमद्वितीयपादावपि, आर्यायाः उत्तरार्धेन–द्वितीयचतुर्थपादेन तुल्यं–सदृशं, प्रयुक्तं–श्लोके उच्चरितं (भवति) (तर्हि) महाकवयः–कवीश्वराः तामुपगीतिं-तन्नाम्ना प्रकाशयन्ते--प्रकटयन्ति । उपगीतिचरणेषु क्रमान्मात्राः-१२-१५-१२-१५ ॥ ६ ॥

भाषा–हे कामिनि ! जिस श्लोक का पूर्वार्ध भी आर्या

छन्द के उतरार्ध के समान हो, उसे बड़े २ कवीश्वर लोग उपगीति छंद कहते हैं अर्थात् जिसके प्रथम तृतीय चरण में बारह व द्वितीय चतुर्थ में पन्द्रह मात्रा हों उसे उपगीति छंद कहते हैं

अक्षरपङ्क्तिच्छन्दः ।

आद्यचतुर्थं पञ्चमकं चेत् ।
यत्र गुरु स्यात्साक्षरपङ्क्तिः ॥ ७ ॥

अन्वयः—चेत् यत्र आद्यचतुर्थं पञ्चमकं (अक्षरम्) गुरुः स्यात् सा अक्षरपङ्क्तिः (ज्ञेया)

अर्थः—चेत् यदा-यत्र-वृत्तौ, आद्यं-प्रथमं चतुर्थं-तुर्यं पञ्चमकं (अक्षरं) गुरुः—दीर्घं स्यात्—भवेत्, सा अक्षरपङ्क्ति,—अक्षरेति पादपूरणार्थं पङ्क्तिरिति नामकं छन्दो बोध्यम् । अक्षरपङ्क्ति चरणाक्षराणि ५ ग० भ, गु, गु, ऽ।।ऽ, ऽ,

भाषा—जिस छंद में पहिला चौथा और पाचवां अक्षर गुरु (दीर्घ) हो उसको अक्षरपंक्ति छन्द कहते हैं ॥ ७ ॥

शशिवदनाछन्दः ।

अगुरु चतुष्कं भवति गुरू द्वौ ।

घनकुचयुग्मे शशिवदनासौ ॥ ८ ॥

अन्वयः—हे घनकुचयुग्मे (यत्र) चतुष्कं अगुरु भवति, द्वौ गुरू (भवतः) असौ शशिवदना (ज्ञेया)

अर्थः-हे घनकुचयुग्मे । घनं—कठिनं कुचयुग्मं-स्तनयुग्मं यस्य। स्तत्सम्बुद्धौ (यस्यां वृत्तौ) चतुष्कं—चतुःपादेषु आदितो वर्णचतुष्टयं अगुरु—लघु, भवति—जायते—द्वौ पञ्चमषष्ठौ, गुरू—अलघू (भवतः) (तदा) असौ—सा, शशिवदना बोध्या॥८॥' चरणाक्ष० ६ ग०न-य- ॥ऽऽ॥

भाषा—हे कठिन कुचयुग्म वाली ! जिस छन्द में पहले चार अक्षर लघु और बाद के दो अर्थात् पांचवां और छठवां अक्षर गुरु हों उसको शशिवदना छंद कहते हैं ॥ ८ ॥

मदलेखाछन्द ।

तुर्यं पञ्चमकं चेद्यत्र स्याल्लघु बाले ।
विद्वद्भिर्मृगनेत्रे प्रोक्ता सा मदलेखा ॥ ९ ॥

अन्वयः—हे बाले चेत् यत्र तुर्यम् पञ्चमकम् (अक्षरम्) लघु स्यात् । हे मृगनेत्रे विद्वद्भिः सा मदलेखा प्रोक्ता ॥ ९ ॥

अर्थः—हे बाले—नवयौवने ! चेत्—यदि, यत्र—यस्यां वृत्तौ

तुर्यम्-चतुर्थम्, पञ्चमकं-पञ्चम(अक्षरं)लघु-ह्रस्वं, स्यात्-भवेत् (तदा) हे मृगनेत्रे-चञ्चलाक्षि ! विद्वद्भिः-पण्डितैः सा-असौ मदलेखा-तन्नामकं छन्दः, प्रोक्ता-कथिता। मदलेखा चरणाक्ष० ७ ग० म, स, गु, SSS, SSII, I॥ ९ ॥

भाषा-हे बाले जिस श्लोक में चौथा पांचवां अक्षर लघु हो, हे मृगनेत्रे पण्डित लोग उसको मदलेखा छन्द कहते हैं ॥ ९

अष्टाक्षरजाति (अनुष्टुबादि) छन्दः ।

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥ १०॥

अन्वयः-श्लोके सर्वत्र षष्ठं गुरु, पञ्चमं लघु, द्विचतुष्पादयोः सप्तमम्, ह्रस्वम्, अन्ययोः (सप्तमम्) दीर्घम् ज्ञेयम् ॥ १० ॥

अर्थः-श्लोके-पद्ये (अनुष्टुबि) सर्वत्र-चतुर्ष्वपि पादेषु, षष्ठम्-तदक्षरं, गुरु-दीर्घं, ज्ञेयम्-बोध्यम् पञ्चममक्षरं, लघु--एकमात्रिकं, तथा द्विचतुष्पादयोः-द्वितीयचतुर्थचरणयोः सप्तमम्-सप्तममक्षरम् ह्रस्वम्-लघु ज्ञेयम्, अन्ययोः-प्रथम तृतीयपादयोः सप्तममक्षरं दीर्घं-द्विमात्रिकं ज्ञेयम् ।

भाषा—जिस श्लोक के चारों चरणों में छटवां अक्षर गुरू तथा पांचवां अक्षर लघु हो, तथा द्वितीय और चतुर्थ चरण में सातवांअक्षर ह्रस्व हो परन्तु प्रथम और तृतीय चरणमें सातवां अक्षर दीर्घ हो तो उसको अनुष्टुप् छंद कहते हैं ॥ १०॥

पद्यछन्दो लक्षणम् ।

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीयादेतत्पद्यस्य लक्षणम् ॥११॥

अन्वयः—सर्वत्र पञ्चमम्, लघु, द्विचतुर्थयोः (पादयोः) सप्तमम् (लघु) षष्ठं गुरु विजानीयात, एतत पद्यस्य लक्षणमस्ति ॥ ११ ॥

अर्थः–(यत्र वृत्तौ) सर्वत्र–चतुर्षु पादेषु, पञ्चममक्षरं लघु–अगुरु (तथा) द्विचतुर्थयोः–द्वितीयचतुर्थपादयोः सप्तममक्षरं, लघु–अगुरु भवति, सर्वत्र षष्ठं–तत्सङ्ख्याकं गुरु–दीर्घं विजानीयात्–बोद्धव्यम्, एतत्–इदं–पद्यस्य–तदाख्यछन्दसः लक्षणं–स्वरूपमस्ति । पद्यं, चरणाक्ष० ८ गणनियमो नास्ति ॥ ११ ॥

भाषा—जिस श्लोक के चारो चरणों में पाचवां अक्षर लघु हो तथा द्वितीय और चतुर्थ चरण में सातवां अक्षर लघु हो और चारो चरणों में छठवां अक्षर गुरु हो तो उसको पद्यछंद कहते हैं ॥ ११ ॥

माणवकं छन्दः ।

आदिगतं तुर्यगतं पञ्चमकं चान्त्यगतम् ।
स्याद्गुरु चेत्सङ्कथितं माणवकाक्रीडमिदम् ॥१२॥

अन्वयः—चेत, आदिगतं तुर्यगतं पञ्चमकं अन्त्यगतं च (अक्षरम्) गुरुः स्यात, इदम् माणवकाक्रीडं सङ्कथितम् ॥ १२ ॥

अर्थः—चेत्—यदि, आदगतं—प्रथमाक्षरं, तुर्यगतं—चतुर्थम्, पञ्चमकम्-पञ्चमम्, अन्त्यगतं--अन्त्ये वर्तमान च (अष्टमम्)गुरुः--दीर्घं,स्यात्--भवेत्।इदं—एतत्,माणवकाक्रीडम्--एतन्नामकं छन्दः (कविभिः) सङ्कथितम्--प्रोक्तम् ॥ १२ ॥ माणवकं चरण ८ ग० भ, त,ल,गु, ऽ।।,ऽऽ।,।,ऽ,

भाषा—जिस छन्द में पहिला चोथा पांचवां और अन्त्य (अष्टम) का अक्षर गुरु हो उसको माणवकाकाड़ छंद कहते हैं ॥ १२ ॥

प्रमाणिका नगस्वरूपिणी ।

द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा ।
तदा निवेदयन्ति तां बुधा नगस्वरूपिणीम्॥१३॥

अन्वयः—यदा, द्वितुर्यषष्ठम्, अष्टमम्, (अक्षरम्) प्रयोजितं गुरुः (स्यात्) तदा, बुधाः ताम्, नगस्वरूपणीं निवेदयन्ति ॥ १३ ॥

अर्थः--यदा—चेत्, द्वितुर्यषष्ठम्--द्वितीयं चतुर्थं षष्ठमष्टमं च (अक्षरम्) प्रयोजितं--प्रयोगीकृतं गुरुः—दीर्घं (स्यात्) तदा, बुधाः--पण्डिताः तां नगस्वरूपिणीं--तन्नामधेयं वृत्तं निवेदयन्ति--प्रतिपादयन्ति ॥ १३ ॥ च. अ. ८ ग. ज, र, ल, गु ।ऽ।, ऽ।ऽ, ।,ऽ,

भाषा—जिस छन्द में दूसरे, चौथे, छठवे और आठवे अक्षर का दीर्घ प्रयोग किया जाता है इसको पण्डित लोग नगस्वरूपिणी छन्द कहते हैं ॥ १३ ॥

विद्युन्माला छन्दः ।

सर्वे वर्णा दीर्घा यस्यां विश्रामः स्याद्वेदैर्वेदैः ।
विद्वद्वृन्दैर्वीणावाणि व्याख्याता सा विद्युन्माला१४

अन्वयः—हे वीणावाणि ! यस्यां सर्वे वर्णाः दीर्घाः (स्युः) । वेदैर्वेदैः (वर्णैः) विश्रामः

स्यात्, विद्वद्वृन्दैः सा विद्युन्माला व्याख्याता॥१४॥

अर्थः-वीणेव वाणी यस्यास्तत्सम्बुद्धौ हे वीणा वाणि । यस्यां-वृत्तौ, सर्वे वर्णाः-निखिलान्यक्षराणि, दीर्घाः-द्विमात्रिकाः भवेयुः । (तथा) वेदैर्वेदैः-चतुर्भिश्चतुर्भिः(अक्षरैः)विश्रामः-यतिःस्यात्-भवेत्,विद्वद्वृन्दैः पण्डित समूहैः सा-असौ विद्युन्माला-तन्नामकं वृत्तं व्याख्याता-कथिता ॥१४॥ च० अ० ८, ग० म, म, गु,गु, यतिः ४,४,ऽऽऽ,ऽऽऽ,ऽ,ऽ,

भाषा—हे वीणा के समान मधुर भाषण करनेवाली ! जिस छन्द में सम्पूर्ण वर्ण दीर्घ हों और चार २ अक्षरों पर विराम अर्थात् ठहराव हो ऐसे श्लोक को पण्डित जन विद्युन्माला छन्द कहते हैं ॥ १४ ॥

चम्पकमाला छन्दः ।

तन्वि गुरु स्यादाद्यचतुर्थं पञ्चमषष्ठं चान्त्यमुपान्त्यम्।

इन्द्रियबाणैर्यत्र विरामः सा कथनीया चम्पकमाला१५

अन्वयः—हे तन्वि, यत्र आद्यचतुर्थम्, पञ्चमषष्ठम्, अन्त्यम्, उपान्त्यं च (अक्षरम्) गुरुः स्यात् । इन्द्रियबाणैः (यत्र) विरामः (स्यात्) सा चम्पकमाला कथनीया ॥१५॥

अर्थः—हे तन्वि-कोमलाङ्गि, यत्र-यस्मिन् पद्ये, आद्यं-आदिभवं चतुर्थं-तुर्यं, पञ्चम, षष्ठं—तत्संख्याकं, अन्त्यं-दशमं, उपान्त्यं-अन्त्यसमीपं नवमं च (अक्षरम्)गुरुः-दीर्घं स्यात्-भवेत्। तथा इन्द्रियबाणैः-पञ्चभिः२ अक्षरैःविरामः-विश्रामः भवेत्, सा-असौवृत्तिः, चम्पकमाला-तदाख्या-यिका, वृत्तिकथनीया-वक्तव्या,। चम्पकमाला च० अ० १० ग० भ म, स, गु, यतिः, ५, ५, ऽ।।, ऽऽऽ, ।।ऽ,ऽ, ।।१५।।

भाषा—हे कृशाङ्गि! जिस छन्द में पहिला, चौथा, पांचवां छठवां अन्त्य का अर्थात् दशवां और अन्त्य के पास का अर्थात् नौवां अक्षर गुरु हो तथा पांच पांच वर्णों पर जिसमें विराम हो उसको चम्पकमाला छंद कहना चाहिये ॥ १५ ॥

मणिबन्ध छन्दः।

चम्पकमाला यत्र भवेदन्त्यविहीना प्रेमनिधे।
छन्दसि दत्ता ये कवयस्तन्मणिबन्धं ते ब्रुवते ॥१६॥

अन्वयः—हे प्रेमनिधे! यत्र चम्पक-माला अन्त्यविहीना भवेत, ये कवयः छन्दसि दत्ताः (सन्ति) ते तत मणिबन्धं ब्रुवते,

अर्थः-प्रेम्णोऽनुरागस्य निधिरिव निधिस्तत्सम्बुद्धौ हे प्रेम निधे, यत्र-वृत्तौ, चम्पकमाला—तदाख्यं छन्दः, अन्त्य

विहीना (सर्वाङ्ग सम्पन्नापि) अन्त्येन — दशमाक्षरेण विहीना-रहिता, भवेत् -स्यात्, ये कवयः-ये काव्यज्ञाः छन्दसि-छन्दोविषये, दक्षाः-चतुराः (सन्ति) ते-अपी, तत् मणिबन्धं-तन्नामकं छन्दः ब्रुवते-कथयन्ति। मणिबन्धम्, च० अ० ९, ग० भ,म स० यतिः ५,४ऽ।।,ऽऽऽ, ।।ऽ,१६॥

भाषा — हे प्र मनिधे ! जिस छन्द में अन्त्य अक्षर से रहित चम्पक माला का लक्षण पाया जाता हो उसको छन्दशास्त्र में दक्ष कवि लोग मणिबंध छन्द कहते हैं ॥ १६ ॥

शालिनी छन्दः ।

ह्रस्वो वर्णो जायते यत्र षष्ठः
कम्बुग्रीवे तद्वदेवाष्टमान्त्यः ।
विश्रामः स्यात्तन्वि वेदैस्तुरङ्गै-
स्तां भाषन्ते शालिनीं छान्दसीयाः॥१७॥

अन्वयः—हे कम्बुग्रीवे, यत्र षष्ठः, तद्वदेव, अष्टमान्त्यः वर्णः ह्रस्वः जायते । हे तन्वि (यत्र) वेदैः तुरङ्गैः विश्रामः स्यात, छान्दसीयाः तां शालिनीं भाषन्ते ॥ १७ ॥

अर्थः—हे कम्बुग्रीवे। कम्बोः-शङ्खस्य ग्रीवेव ग्रीवा यस्यास्त-

कम्बुग्रीवे हे कम्बुग्रीवे-कम्बुकण्ठि। यत्र-यस्मिन् पद्ये,षष्ठः वर्णः-षष्ठमक्षरम्, तद्वदेव-इत्थमेव,अष्टमान्त्यः-नवमः,ह्रस्वः-लघुर्जायते-भवति, हे तन्वि-हे कृशाङ्गि। (तथा) वेदैश्चतुर्भिः तुरङ्गैः-सप्तभिश्च विश्रामः-यतिः स्यात्-भवेत्, छान्दसीयाः-छन्दःशास्त्रज्ञाः तां-अमुम्, शालिनीं-तन्नामकं छन्दः भाषन्ते-ब्रुवते। शालिनी च० अ० ११ ग० म, त त, गु, गु, यतिः ४, ७,SSS, SS|,SS|,S,S,॥१७॥

भाषा—हे शंख के समान ग्रीवावाली! हे सूक्ष्माङ्गि! जिस छन्द में छठवां और अष्टमांत्य अर्थात् नवम अक्षर लघु हो तथा चौथे और सांतवे अक्षर पर विराम होतो छन्द के ज्ञाता उसको शालिनी छन्द कहते हैं॥ १७॥

मन्दाक्रान्ता छन्दः।

चत्वारःप्राक् सुतनु गुरवो द्वादशैकादशौचे-
न्मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशान्त्यौ।
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते विरामो
मन्दाक्रान्तां प्रवरकवयस्तन्वि तां सङ्गिरन्ते ॥१८॥

अन्वयः—हे सुतनु प्राक् चत्वारः (वर्णाः) द्वादशैकादशौ वर्णौ च गुरवः (स्युः) हे मुग्धे, हे

कुमुदामोदिनि, तदनु द्वादशान्त्यौ, तद्वच्च, अन्त्यौ वर्णौ (गुरू स्याताम्) हे कान्ते यत्र युगरसहयैः विरामः (भवति) । हे तन्वि प्रवरकवयः तां मन्दाक्रान्तां सङ्गिरन्ते ॥ १८ ॥

अर्थः-हे सुतनु-सुगात्रि, प्राक्-प्रथमम्, चत्वारः-, चतुसंख्याकाः वर्णाः-अक्षराणि, गुरवः—दीर्घाः स्युः-भवेयुः तथा, द्वादशैकादशौ – इमौ वर्णौ (गुरू स्याताम्) हे मुग्धे-हे सुन्दरि ! कुमुदवत् आमोदः – सौरभं यस्या सा तत्सम्बुद्धौ तदनु ततः द्वादशान्त्यौ-त्रयोदशचतुर्दशौ वर्णौ (गुरू भवतः) तद्वत् एवमन्त्यौ-षोडशसप्तदशौ च (गुरू भवतः) हे-कान्ते ! यत्र-वृत्तौ युगरसहयैः-चतुः-षट्-सप्तभिः (क्रमेण) विरामः-विश्रामः (भवति) हे तन्वि-कृशाङ्गि, प्रवरकवयः-कविवराः, तां-वृत्तिं मन्दाक्रान्तां-तन्नामिकां सङ्गिरन्ते-प्रतिपादयन्ति । मन्दाक्रान्ता. च० अ० १७, ग० म, भ, न, त, त, गु, गु, यतिः ४, ६, ७, SSS, SII, III, SSI, SSI, S, S,

भाषा—हे सुतनु जिसमे पहिले चार अक्षर गुरुहों, और हेमुग्धे ग्यारह बारहवां तेरहवां और चौदहवां अन्त्यके दों अक्षर गुरुहों और चौथे छठवे और सातवें अक्षर परविरामहो उसको मन्दाक्रान्ताकहते हैं ॥ १८ ॥

हंसी छन्दः ।

मन्दाक्रान्तान्त्ययतिरहिता सालङ्कारे भवति यदि सा । तद् विद्वद्भिर्ध्रुवमभिहिता ज्ञेया हंसी कमलबदने ॥ ११ ॥

अन्वयः–हे सालङ्कारे यदि मन्दाक्रान्ता अन्त्ययति रहिता भवति । हे कमलवदने तद्विद्वद्भिः ध्रुवं अभिहिता सा हंसी ज्ञेया ॥ १६ ॥

अर्थः–हे सालङ्कारे–भूषणभूषिते, यदि–चेत, मन्दाक्रान्ता–तन्नामकं छन्दः, अन्त्ययतिरहिता–सप्ताक्षरविश्रामरहिता, अर्थात् दशाक्षरपादरचिता, भवति–जायते, हे कमलवदने, कमलवत्–सौन्दर्यसौरभादिगुणैः कमलसदृशं वदनं–मुखं यस्या स्तत्सबुद्धौ, विद्वद्भिः–पण्डितैः ध्रुवं–निश्चयेन अभिहिता–प्रतिपादिता सा–हंसी–तदाख्यं छन्दः–ज्ञेया–बोध्या ॥ हंसी. च. अ. १० ग० म, भ, न, गु; यतिः ४, ६, ऽऽऽ, ऽ।।, ।।। ऽ।।, १६॥

भाषा–हे अलङ्कार धारण करनेवाली ! हे कमलसदृश मुखवाली । जब मंदाक्रान्ता अन्त्ययति (विश्राम) रहित हो तो पण्डित जनों से कहा हुआ निश्चयसे उसको हंसीछन्दजानना,

अर्थात् मन्दाक्रांता में १७ अक्षर होते हैं तथा चौथे छठवे और सातवे अक्षरों पर विराम होता है । परन्तु हंसीछन्द में १० अक्षर होते हैं जिनमें आदि के ४ अक्षर दीर्घ पांचवें से नौवें तक लघु और दसवां दीर्घ अक्षर और ४ तथा ६ अक्षरों पर विराम होता है ॥ १९ ॥

दोधक वृत्तम् ।

आद्यचतुर्थमहीननितम्बे सप्तमकं दशमं च तथा-न्त्यम् । यत्र गुरु प्रकटस्मरसारे ! तत्कथितं ननु दोधकवृत्तम् ॥ २० ॥

अन्वयः—हे अहीननितम्बे, आद्यचतुर्थं सप्तमकं दशमं तथा अन्त्यं च यत्र गुरुः (स्यात) हे प्रकटस्मरसारे ननु तत दोधकवृत्तं कथितम् ॥ २० ॥

अर्थः—हे अहीननितम्बे।अहीनौ-स्थूलौ नितम्बौ-कटिपश्चाद्भागौ यस्याः सा तत्सम्बुद्धौ हे पृथुश्रोणे । आद्यचतुर्थं—प्रथमतुर्यं,सप्तमकं—सप्तम, दशमं—तत्संख्याकं, तथा—एवं अन्त्यं—एकादशं च यत्र गुरुः—दीर्घं स्यात् ।हे प्रकट

स्मरसारे ! प्रकटः—प्रकाशः स्मरसारः—कामबलं यस्या स्तत्सम्बुद्धौ, ननु—निश्चयेन तद्—छन्दः दोधकवृत्तं—तदाख्य (कविभिः) कथितम्—प्रतिपादितम्।दोधक० च. अ. ११, ग. भ, भ, भ, गु, गु,ऽ।।,ऽ।।,ऽ।।,ऽ,ऽ,२०

भाषा—हे पुष्टनितम्बवाली ! हे कामदेव के बलको प्रकट करनेवाली ! जिसमें पहिला, चौथा, सातवां, दशवां और अन्त्य का (ग्यारहवां) अक्षर गुरु हो उसको दोधकवृत्त कहते हैं ॥ २० ॥

इन्द्रवज्रा छन्दः ।

यस्यां त्रिषट्सप्तममक्षरं स्याद्ध्रस्वं सुजङ्घे ! नवमं च तद्वत् । गत्या विलज्जीकृतहंसकान्ते तामिन्द्रवज्रां ब्रुवते कवीन्द्राः ॥ २१ ॥

अन्वयः—हे सुजङ्घे, यस्यां त्रिषट् सप्तमं, तद्वत् नवमं च अक्षरं हृस्वं स्यात्, हे गत्या विलज्जीकृतहंसकान्ते । कवीन्द्राः तां इन्द्रवज्रां ब्रुवते ॥ २१ ॥

अर्थः—हे सुजङ्घे सुष्ठु-शोभने जंघे यस्यास्तत्सम्बुद्धौ,

यस्यां-वृत्तौ, त्रि-षट्-सप्तमं अक्षरं-वर्णः, तद्वत्-एवमेव नवं तत्संख्याकमक्षरं ह्रस्वं-लघु, स्यात्-भवेत्, हे गत्या-गमनेन, विलज्जीकृता-तिरस्कृता हंसस्य कान्ता-हंसी येन तत्सम्बुद्धौ, कवीन्द्राः-कविश्रेष्ठाः तामिन्द्रवज्रां-एतन्नामकं छन्दः, ब्रुवते-कथयन्ति इ. च. अ. ११ ग. त, त, ज, गु, गु, यति. ५.६, ऽऽ।ऽऽ।।ऽ।ऽऽ

भाषा—हे सुन्दरजंघावाली ! हे गति से हंसी को लज्जित करनेवाली ! जिस छन्द में तीसरा, छठवां, सातवां और नौवां अक्षर ह्रस्व हो उसको कवीश्वर इन्द्रवज्रा छन्द कहते हैं ॥२१॥

उपेन्द्रवज्रा ।

यदीन्द्रवज्राचरणेषु पूर्वे भवन्ति वर्णा लघवः सुवर्णे । अमन्दमाद्यन्मदने तदानीमुपेन्द्रवज्रा कथिता कवीन्द्रैः ॥ २२ ॥

अन्वयः—हे सुवर्णे, यदि इन्द्रवज्राचरणेषु पूर्वे वर्णाः लघवः भवन्ति । हे अमन्द माद्यन्मदने, तदानीं कवीन्द्रैः उपेन्द्रवज्रा कथिता ॥ २२ ॥

अर्थः हे सुवर्णे-शोभनवर्णे, यदि-चेत्, इन्द्रवज्रा चरणेषु-तन्नामकछन्दसः चतुर्षु चरणेषु पूर्वे-प्रथमे,

वर्णाः — अक्षराणि, लघवः — ह्रस्वाः भवन्ति — जायन्ते । हे अमन्दमाद्यन्मन्दने ! अमन्दः — अधिकः माद्यन् — हर्षं कुर्वन् मदनः — कामः यस्यां सा तत्सम्बुद्धौ, तदानीं — तर्हि, कवीन्द्रै – कविवरैः उपेन्द्रवज्रा — एतन्नामकं छन्दः, कथिता—प्रोक्ता । उपेन्द्र- वज्रा० च० अ० ११, ग० ज, त, ज, गु, गु, यतिः ५, ६, ।ऽ।ऽऽ।, ।ऽ।, ऽ ऽ, ॥२२॥

भाषा—हे सुन्दर वर्णवाली । यदि इन्द्रवज्रा के चारो चरणों में शुरू के अक्षर ह्रस्व हों तो हे अधिक कामवाली ! कवीश्वर लोग उसको उपेन्द्रवज्रा छन्द कहते हैं ॥२२॥

उपजातिः ।

यत्र द्वयोरप्यनयोस्तु पादाः
भवन्ति सीमन्तिनि चन्द्रकान्ते ॥
विद्वद्भिराद्यैः परिकीर्तिता सा
प्रयुज्यतामित्युपजातिरेषा ॥ २३ ॥

अन्वयः—हे सीमन्तिनि, हे चन्द्रकान्ते, यत्र तु अनयोः द्वयोः अपि पादाः भवन्ति । आद्यैः, विद्वद्भिः परिकीर्तिता सा एषा उपजातिः इति प्रयुज्यताम् ॥ २३ ॥

अर्थः — हेसीमन्तिनी !सीमन्तः—केशवेशःविद्यते यस्या स्तत्सम्बुद्धौ हे चन्द्रकान्ते ! चन्द्रवत्कान्तिर्यस्यास्तत्सम्बुद्धौ, यत्र — वृत्तौ, अनयोः — इन्द्रवज्रोपेन्द्रयोः द्वयोरपि — उभयो रेव पादाः — चरणाः भवन्ति—जायन्ते, यथा—इन्द्रवज्रालक्ष णं प्रथमतृतीयपादे द्वितीयचतुर्थपादे तूपेन्द्रवज्रालक्षणं भवति, आद्यैः-पुरातनैः विद्वद्भि-:विचक्षणैः,परिकीर्तिता - प्रोक्ता सा — असौ, एषा — इयं, उपजातिः — तदाख्यं छन्दः इति प्रयुज्यताम्—प्रयोगविषयी क्रियताम्. त्वयेति शेषः । उपजातिः च० अ० ११॥२३॥

भाषा —हे सुन्दर केशवाली ! हे चन्द्रकांते ? जिस छन्द में इन्द्रवज्रा और उपेद्रवज्रा दोनों के चरण हों अर्थात् प्रथम और तृतीय चरण इन्द्रवज्रा के तथा द्वितीय और चतुर्थचरण उपेन्द्र वज्रा के हों उसको प्राचीन कवि उपजाति छन्द कहते हैं ॥२३॥

आख्यानकी छन्दः ।

आख्यानकी स्यात् प्रकटीकृतार्थे
यदीन्द्रवज्राचरणः पुरस्तात् ।
उपेन्द्रवज्राचरणास्त्रयोऽन्ये
मनीषिणोक्ता विपरीतपूर्वा ॥ २४ ॥

अन्वयः--हे प्रकटीकृतार्थे यदि पुरस्तात् इन्द्रवज्राचरणः (भवेत्) अन्ये त्रयः उपेन्द्रवज्राचरणाः (स्युः) सा मनीषिणा उक्ता विपरीतपूर्वा आख्यानकी स्यात् ॥ २४ ॥

अर्थः-हे प्रकटीकृतार्थे ! प्रकटीकृतः-प्रकाशितः अर्थः-स्वाभिप्रायो यया सा तत्सम्बुद्धौ, यदि-चेत्, पुरस्तात्-प्रथमः, इन्द्रवज्रावत् चरणः-पादः(भवेद्) अन्ये शेषाःत्रयः-द्वीतीय तृतीय चतुर्था उपेन्द्रवज्रावत् चरणाः-पादाः(स्युः) सा-असौ मनीषिणा-पण्डितेन, उक्ता-कथिता, विपरीत पूर्वाख्यानकी-विपरीताख्यानकी स्यात्-भवेत्।आख्यानकी च०अ०११,प्रथम चरणः इन्द्रवज्रावत् अन्ये उपेन्द्रवज्रावत्२४

भाषा-हे प्रयोजन को प्रगट करनेवाली यदि पहिला चरण इन्द्रवज्रा का हो और शेष के तीन चरण उपेन्द्रवज्रा छन्द के हों तो पण्डितों ने उसको विपरीताख्यानकी छन्द कहा है ॥२४॥

रथोद्धता छन्दः ।

आद्यमक्षरमतस्तृतीयकं
सप्तमं च नवमं तथान्तिमम्

दीर्घमिन्दुमुखि यत्र जायते
तां वदन्ति कवयो रथोद्धताम् ॥२५॥

अन्वयः—यत्र आद्यं, अतः तृतीयकं सप्तमं नवमं च तथा अन्तिमं अक्षरं दीर्घं जायते, हे इन्दुमुखि कवयः तां रथोद्धतां वदन्ति ॥ २५ ॥

अर्थः—यत्र – यस्यां वृत्तौ, आद्यं – चरणानां, मादिमम्, अतः – अनन्तरम् तृतीयकं – तृतीयं, सप्तमं नवमं च तथा – एवमेव अन्तिमम् – एकादशं, अक्षरं – वर्णः दीर्घम् – अलघु, जायते – भवति । इन्दुवन्मुखं यस्यास्त. त्सम्बुद्धौ, हे इन्दुमुखि ! कवयः – काव्यकर्तारः, तां – अमुम् रथोद्धताम् – तन्नामकं छन्दः, वदन्ति – कथयन्ति । रथोद्धता च० अ०११, ग.र,न,र,ल,गु, यति ७, ४, ऽ।ऽ,।।।,ऽ।ऽ,।,ऽ,

भाषा-हे चन्द्रमुखी ? जिस छन्द में पहिला, तीसरा, सातवां, नववां, और अन्त्य का (ग्यारहवां) अक्षर दीर्घ हो, कवीश्वर उसको रथोद्धता छन्द कहते हैं ॥ २५ ॥

स्वागता छन्दः ।

अक्षरं च नवमं दशमं चेद्व्यत्ययाद्भवति यत्र विनीते।।प्रोक्तमेणशिशुनयने यदि सैव स्वागतेति कविभिः कथिताऽसौ ॥ २६ ॥

अन्वयः—हे विनीते यत्र नवमं दशमं च अक्षरं व्यत्ययात भवति, चेत प्रोक्तम्, हे एणनयने सा एव असौ कविभिः स्वागतेति कथिता ॥ २६ ॥

अर्थः— हे विनीते—नम्रे, यत्र वृत्तौ, नवमं दशमं चाक्षरं—वर्णः व्यत्ययात्—वैपरीत्यात्(अर्थात् रथोद्धताया वैपरीत्येन नवममक्षरं लघु तथा दशममक्षरं गुरु)भवति जायते, चेत् यदिप्रोक्तम्—कथितम् । हे एणनयने, एणस्य—हरिणस्य नयने इव नयने यस्यास्तत्सम्बुद्धौ, सैवासौ—एषैवेयं, कविभिः—पण्डितैः स्वागता—एतन्नामकं छन्दः कथिता—प्रोक्ता । स्वागता, च० अ० ११ ग० र, न, भ, गु, गु, यतिः ७, ४, ऽ।ऽ,।।।,ऽ।।,ऽ.ऽ ॥ २६ ॥

भाषा—हे विनयवाली ! हे सुनयने ! जिस (रथोद्धता)छंद में नौवां और दशवां अक्षर विपर्यय रूप से हों अर्थात् नववां दशवें अक्षर के स्थान में और दशवां अक्षर नववें के स्थान में हो कवियोंने उसको स्वागता छन्द कहा है । रथोद्धता में नववां दीर्घ और दशवां ह्रस्व है परन्तु इसमें दशवां दीर्घ और नववां ह्रस्व है ॥ २६ ॥

वैश्वदेवी छन्दः ।

ह्रस्वो वर्णःस्यात्सप्तमो यत्र बाले ।

तद्वद्बिम्बोष्ठि न्यस्त एकादशाद्यः ।।
बाणैर्विश्रामस्तत्र चेद्धा तुरङ्गै-
र्नाम्ना निर्दिष्टा सुभ्रु सा वैश्वदेवी ॥२७॥

अन्वयः—हे बाले यत्र सप्तमः तद्वत् हे बिम्बोष्ठि एकादशाद्यः वर्णः ह्रस्वः न्यस्तः चेद्धा तत्र बाणैः तुरङ्गैः (वर्णैः) विश्रामः (स्यात्) हे सुभ्रु सा नाम्ना वैश्वदेवी निर्दिष्टा ॥ २७ ॥

अर्थः—हे बाले—षोडशवार्षिके, यत्र—यस्मिन् छन्दसि सप्तमो वर्णः—सप्तमाक्षरम्, तद्वत्—तथैव, हे बिम्बोष्ठि! बिम्बफलवदोष्ठौ यस्याः तत्सम्बुद्धौ, एकादशाद्यः-दशमोवर्णः, अक्षरम् ह्रस्वः—लघु, न्यस्तः—निवेशितः। चेत्-यदि, तत्र—तस्मिन् पद्ये, बाणैः—पञ्चभिः। तुरङ्गैः—सप्तभिश्चक्षरैः विश्रामः—यतिस्स्यात्तर्हि हे सुभ्रु, सुष्ठु—शोभनौ भ्रुवौ यस्याः तत्सम्बुद्धौ, सा—वृत्तिः नाम्ना—अभिधानेन वैश्वदेवी—तन्नामकं छन्दः निर्दिष्टा—कथिता। वैश्वदेवी।च.अ० १२ग० म,म,य,य, यतिः ५,७, SSS,SSS,ISS,ISS ॥२७

भाषा—हे बाले, हे बिम्बाफल के सदृश ओष्ठवाली, जिस छन्द में सातवां और दशवां अक्षर ह्रस्व हों, और हे सुन्दर

भू वाली जिस में पांचवें और सातवें अक्षर पर विराम हो उसको वैश्वदेवी छन्द कहते हैं ॥ २७ ॥

तोटकवृत्तम् ।

सतृतीयकषष्ठमनन्तरते नवमं विरतिप्रभवं गुरु चेत् । घनपीनपयोधरभारनते ननु तोटकवृत्तमिदं कथितम् ॥ २८ ॥

अन्वयः—हे अनन्तरते, चेत् सतृतीयकषष्ठं, नवमं विरतिप्रभवं (अन्त्याक्षरम्) गुरु (स्यात्) हेघनपीनपयोधरभारनते ननु इदं तोटकवृत्तं कथितम् ॥ २८ ॥

अर्थः — हे अनन्तरते! अनन्ता — अपरिमिता रतिर्यस्याः सा तत्सम्बुद्धौ, चेत्-यदि सतृतीयकषष्ठं — तृतीयषष्ठाक्षरसहितं नवमं तत्संख्याकमक्षरं, विरतिप्रभवं — पादानामन्त्यस्थितं च गुरु — दीर्घं स्यात्, हे घनपीनपयोधरभारनते ! घनौ — कठिनौ पीनौ — स्थूलौ च पयोधरौ — स्तनौ तयोः भारेण-गौरवेण नता — नम्रीभूता तत्सम्बुद्धौ, (तदा) ननु — निश्चयेन, इदं — छन्दः तोटकवृत्तं — एतन्नामकं कथि

तां—आख्यातम् । तोटकम् । च० अ० १२, ग० स, स, स स, यतिः ६, ६, ॥ऽ,॥ऽ,॥ऽ,॥ऽ, ॥ २८ ॥

भाषा—हे अपरिमित रतिवाली ! हे सघन और पुष्ट स्तनों के भार से नम्र हुई ! जिस छन्दमें तीसरा छटवां, नववां और अन्त्य का अक्षर गुरु हो, उसको तोटकवृत्त कहते हैं ॥ २८ ॥

भुजङ्गप्रयातं छन्दः।

यदाद्यं चतुर्थं तथा सप्तमं स्यात्तथैवाक्षरं-
ह्रस्वमेकादशाद्यम् । शरच्चन्द्रविद्वेषिवक्त्रारविन्दे
तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥ २९ ॥

अन्वयः—हे शरच्चन्द्रविद्वेषिवक्त्रारविन्दे, यदा आद्यं चतुर्थं सप्तमं तथा एकादशाद्यं अक्षरं ह्रस्वं चेत (तदा) कवीन्द्रैः तत भुजङ्गप्रयातं उक्तम् ॥२९॥

अर्थः—शरदः—ऋतोः चन्द्रस्य विद्वेषि—शत्रु भूतं वक्त्रमेवारविन्दं—कमलं यस्याः तत्सम्बुद्धौ, यदा—यस्मिन् पद्ये, आद्यं—प्रथमम्, चतुर्थम्—तुर्यम्, सप्तमम्, तथा—इत्थं एकादशाद्यं—दशममक्षरं—वर्णः—ह्रस्वं

चेत्—। लघुः स्यात् (तदा) कवीन्द्रैः-कविप्रवरैः तत्-अदः, भुजङ्गप्रयातम् — तन्नामकं उक्तम् — कथितम् । भुजङ्ग प्रयातम् । च० अ० १२ ग. य, य, य, य, यतिः ६, ६, ॥ ।SS,।SS,।SS;।SS,॥२९॥

भाषा — हे शरच्चन्द्रको अपने मुख कमल से लज्जित करने वाली, जिस छन्दमे पहिला, चौथा, सातवां, और दशवां अक्षर ह्रस्व हो उसको कवीश्वरों ने भुजङ्गप्रयात छंद कहा है ॥२९॥

द्रुतविलम्बितं छन्दः ।

अयि कृशोदरि यत्र चतुर्थकं
गुरु च सप्तमकं दशमं तथा ।
विरतिजं च तथैव विचक्षणै-
द्रुतविलम्बितमित्युपदिश्यते ॥ ३० ॥

अन्वयः—अयि कृशोदरि, यत्र चतुर्थकं सप्तमकं तथा दशमं, तथैव, विरतिजं च (अक्षरम्) गुरु (स्यात्) विचक्षणैः द्रुतविलम्बितमिति उपदिश्यते ॥ ३१ ॥

अर्थः — अयीति कोमलालापे, हे कृशोदरि,

कृशं — तनु उदरं — मध्यभागो यस्यास्तत्सम्बुद्धौ, यत्र — यस्मिन् पद्ये, चतुर्थकम्-तुर्यम्, सप्तमकम्-सप्तमम्, तथा-तेनैव प्रकारेण, दशमम् — तत्संख्याक, तथैव — तेनैव रीत्या, विरति-जं-अन्त्यं द्वादशं चाक्षरं गुरु — दीर्घं स्यात्तदा विचक्षणैः — पण्डितैः द्रुतविलम्बितमिति — तन्नामधेयेन उपदिश्यते — कथ्यते। द्रुतविलम्बितम्। च. अ. १२, ग. न, भ, भ. र ।।।,ऽ।।,ऽ।।,ऽ।ऽ, ॥ ३० ॥

भाषा — हे कृशोदरि? जिस छंद में चौथा सातवां, दशवां, और अन्त्य का (बारहवां) अक्षर गुरु (दीर्घ) हो, पंडित लोग उसको द्रुतविलम्बित छंद कहते हैं॥ ३० ॥

प्रमिताक्षरा छन्दः ॥

यदि तोटकस्य गुरु पञ्चमकं
विहितं विलासिनि तदक्षरकम्।
रससंख्यकं गुरु न चेदबले
प्रमिताक्षरेति कविभिः कथिता ॥ ३१ ॥

अन्वयः — यदि तोटकस्य पञ्चमकं अक्षरकं गुरु विहितम्। हे विलासिनि, हे अबले। रससंख्यकं

चेत् गुरु न (स्यात) (सा) कविभिः प्रमिताक्षरा इति कथिता ॥ ३१ ॥

अर्थः—यदि—चेत् तोटकस्य—तदाख्यवृत्तस्य, पञ्चमकं—पञ्चमम्, अक्षरकं—अक्षरम्, गुरु—दीर्घं विहितम्—प्रयुक्तं भवेत् । हे विलासिनि, विलासो—विभ्रमोऽस्ति अस्यास्तत्सम्बुद्धौ, हे अबले—नायिके, रससंख्यकं—षष्ठं चेत्—यदि, गुरु—दीर्घं, न—नहि स्यात्, (सा) कविभिः—पण्डितैः प्रमिताक्षरा—तन्नामकं छन्दः इति—इत्थम्—कथिता—प्रोक्ता । प्रमिताक्षरा । च० अ० १२, ग०, स, ज, स, स ॥ऽ,।ऽ।,।।ऽ,।।ऽ,॥३१॥

भाषा-हे विलास करनेवाली ! हे अबले । यदि तोटक छंद का पांचवां अक्षर गुरु हो और छटवां अक्षर लघु हो तो कवियों ने उसको प्रमिताक्षरा छंद कहा है ॥ ३१ ॥

हरिणीप्लुता छन्दः ।

प्रथमाक्षरमाद्यतृतीययो-
र्द्रुतविलम्बितकस्य च पादयोः
यदि चेन्न तदा कमलेक्षणे
भवति सुन्दरि सा हरिणीप्लुता ॥३२॥

अन्वयः—हे कमलेक्षणे, यदि, द्रुतविलम्बितकस्य च आद्यतृतीययोः पादयोः प्रथमाक्षरं न चेत्, हे सुन्दरि तदा सा हरिणीप्लुता भवति॥३२॥

अर्थः—हे कमलेक्षणे । कमलवत्—पद्मवत् ईक्षणे-नेत्रे—यस्यास्तत्सम्बुद्धौ, यदि—चेत्, द्रुतविलम्बितकस्य-तदाख्यच्छन्दसः, च—पादपूरणे, आद्यतृतीययोः—प्रथमतृतीययोः पादयोः—चरणयोः, प्रथमाक्षरं—आद्यमक्षरं, न चेत्—नो स्यात् । हे सुन्दरि—शुभांगे,तदा-तस्मिन् काले सा—असौ, हरिणीप्लुता—तदाख्यं छन्दः भवति—जायते । हरिणीप्लुता । च० १, ३, अ० ११, ग. स, स स, ल, गु, ।।ऽ,।।ऽ,।।ऽ,।,ऽ, २, ४, अ० १२, ग. न, भ, भ,र ।।।,ऽ।।,ऽ।।,ऽ।ऽ ॥३२॥

भाषा—हे कमलनयने ! हे सुंदरि! यही द्रुतविलम्बितछंद के पहिले और तीसरे पाद को आदि का अक्षर न हो तो वह हरिणीप्लुता छंद हो जाता है ॥३२॥

वंशस्थं वृत्तम् ।

उपेन्द्रवज्राचरणेषु सन्ति चे-
दुपान्त्यवर्णा लघवः कृता यदा ।

मदोल्लसद्भ्रूजितकामकार्मुके ।
वदन्ति वंशस्थमिदं बुधास्तदा ॥ ३३ ॥

अन्वयः—हे मदोल्लसद्भ्रूजितकामकार्मुके ! चेत् उपेन्द्रवज्राचरणेषु उपान्त्यवर्णाः यदा लघवः कृताः (स्युः) तदा बुधाः इदं वंशस्थं वदन्ति ३३

अर्थः—हे मदोल्लसद्भ्रूजितकामकार्मुके ! मदेन उल्लसद्भ्यां भ्रूभ्यां जितं कामस्य कार्मुकं – धनुर्यया सा तत्सम्बुद्धौ । चेत् – यदि, उपेन्द्रवज्राचरणेषु – एतच्छन्दसः चतुर्षु चरणेषु, उपान्त्यवर्णाः – अन्त्यसमीपस्थितान्यक्षराणि यदा – यस्मिन् पद्ये, लघवः – ह्रस्वाः, कृताः – निहिताः, (स्युः) तदा – तस्मिन् पद्ये बुधाः – पण्डिताः, इदं – एतच्छन्दः वंशस्थं – एतन्नामकं, वदन्ति – कथयन्ति । वंशस्थम् । च. अ. १२ ग०, ज, त, ज, र, यतिः ५, ७, ।ऽ।, ऽऽ।, ।ऽ, ऽ।ऽ, ॥ ३३ ॥

भाषा—हे मद से शोभायमान भृकुटी के विलास से कामदेव के धनुष को जीतनेवाली ! यदि उपेंद्रवज्रा के चारो चरणों में उपांत्य वर्ण अर्थात् बारहवें अक्षर के पहिले का ग्यारहवां अक्षर ह्रस्व हो, और बारहवां अक्षर गुरु हो तो पंडित लोग उसको वंशस्थ छंद कहते हैं ॥ ३३ ॥

इन्द्रवंशा छन्दः

यस्यामशोकाङ्कुरपाणिपल्लवे
वंशस्थपादा गुरुपूर्ववर्णकाः ।
तारुण्यहेलारतिरङ्गलालसे ।
तामिन्द्रवंशां कवयः प्रचक्षते ॥ ३४ ॥

अन्वयः—हे अशोकाङ्कुरपाणिपल्लवे ! यस्यां वंशस्थपादाः गुरुपूर्ववर्णकाः (स्युः) हे तारुण्यहेलारतिरङ्गलालसे ! कवयः तां इन्द्र ंशां प्रचक्षते ॥ ३४ ॥

अर्थः—हे अशोकाङ्कुरपाणिपल्लवे ! अशोकस्य—वृक्षविशेषस्य अङ्कुरवत्—कलिकावत् पाणिपल्लवौ—करौ यस्यास्तत्सम्बुद्धौ ! यस्यां-वृत्तौ, वशस्थपादाः—वंशस्थछन्दसश्चत्वारश्चरणाः, गुरुपूर्ववर्णकाः—आद्यवर्णाः गुरवः स्युः ! हे तारुण्यहेलारतिरङ्गलालसे । तारुण्यस्य—यौवनस्य हेलाभिः—क्रीडाभिः रतिरङ्गे—सुरतसंग्रामे लालसाऽभिलाषा यस्यास्तत्सम्बुद्धौ । कवयः—काव्यज्ञाः ताममुम् इन्द्रवंशां—एतदाख्यं छन्दः प्रचक्षते—कथ

यन्ति । इन्द्रवंशा । च. अ. १२, ग. त, त, ज, र, यतिः ५, ७, ऽऽ।,ऽऽ।,।ऽ।,ऽ।ऽ,॥ ३४ ॥

भाषा—हे अशोक के पल्लव के समान अंगुली वाली ! हे तारुण्य के विलाससे रति क्रीड़ा में अभिलाषा करनेवाली ! जिस श्लोक में वंशस्थ छंद के चारों चरणों का प्रथम अक्षर दीर्घ हो उसको कवि लोग इन्द्रवंशा छन्द कहते हैं ॥ ३४ ॥

प्रभावती छन्दः ।

यस्यां प्रिये प्रथमकमक्षरद्वयं-
तुर्यं तथा गुरु नवमं दशान्तिकम् ।
सान्त्यं भवेद्यदि विरतिर्युगग्रहैः-
सा लक्षिता ह्यमृतलते प्रभावती ॥ ३५ ॥

अन्वयः—हे प्रिये यस्यां, प्रथमकं अक्षरद्वयं तुर्यं नवमं तथा सान्त्यं दशान्तिकं गुरु भवेत् । यदि युगग्रहैः विरतिः (भवेत्) हे अमृतलते हि सा प्रभावती लक्षिता ॥ ३५ ॥

अर्थः—हे प्रिये—हे वल्लभे ! यस्यां—वृत्तौ, प्रथमकं—आद्यं अक्षरद्वयम्—वर्णयुगलम्, तुर्यम्—चतुर्थम्

नवमं — तत्संख्याकं, तथा—तेनैव प्रकारेण, सान्त्यम् — त्रयो दशाक्षरसहितं, दशान्तिकम् — एकादशं, गुरु — दीर्घं, भवेत् — स्यात्। यदि — चेत्, युगैः — चतुर्भिः ग्रहैः — नवभिरक्षरै विरतिः — विश्रामः (भवेत्) हे अमृतलते। अमृतस्य — पीयूषस्य लता इव स्थिते ! हि — निश्चयेन, सा — असौ प्रभावती – तदाख्या वृत्तिः, लक्षिता — कथिता। प्रभावती — च. अ. १३ ।ऽ।, ऽ।, ।।ऽ, ।ऽ।, ऽ, ग०, ज, भ, स, ज, गु, यतिः ४,६, ॥३५॥

भाषा—हे अमृतलते ! जिसमें आदि के दो अक्षर अर्थात् पहिला और दूसरा चौथा नववां ग्यारहवां तथा अन्त्य का अक्षर दीर्घ हो और जहां चौथे और दसवें अक्षर पर विराम हो, उसको प्रभावती छन्द जानना ॥ ३५ ॥

प्रहर्षिणी छन्दः ।

आद्यं चेत् त्रितयमथाष्टमं नवान्त्यं-
द्वे चान्त्ये गुरुविरतौ सुभाषिते स्यात् ।
विश्रामो भवति महेशनेत्रदिग्भि-
र्विज्ञेया ननु सुभगे प्रहर्षिणी सा ॥३६॥

अन्वयः—हे सुभाषिते ! चेत् आद्यं त्रितयं

अथ अष्टमं नवान्त्यं (गुरु) स्यात् द्वे च अन्त्ये गुरुविरतौ (स्याताम्) महेशनेत्रदिग्भिः विश्रामः भवति । हे सुभगे ननु सा प्रहर्षिणी विज्ञेया ॥३६॥

अर्थः—हे सुभाषिते—सुवाणि ! चेत्—यदि, आद्यं—आदौ स्थितम्, त्रितयं—वर्णत्रयं, अथ—अनन्तरं, अष्टमं—तत्संख्याकं, नवान्त्यं —दशमं गुरु स्यात् — भवेत् । द्वे - युगलं च अन्त्ये — अवसानस्थिते द्वादशत्रयोदशे च गुरुविरतौ—दीर्घान्वितौ स्याताम् । महेशनेत्रः — त्रिभिः दिग्भिः—दशभिः (वर्णैः) विश्रामः — यतिः, स्यात्—भवेत् । हे सुभगे-शोभनैश्वर्यशालिनि, ननु—निश्चयेन, सा—असौ, प्रहर्षिणी—तन्नामिका वृत्तिः विज्ञेया—बोध्या । प्रहर्षिणी । च. अ. १३, ग. म, न, ज,र,गु,यतिः३,१०, SSS,।।।,।S।,S।S,S,॥३६॥

भाषा—हे मृदु भाषण करनेवाली ! हे सुभगे ! जिसमें आदि के तीन तथा आठवां, दशवां, बारहवां, और तेरहवां अक्षर दीर्घ हो, तीसरे और दशवें अक्षर पर विराम हो उसको प्रहर्षिणी छन्द जानना ॥ ३६ ॥

वसन्त तिलका छन्दः

आद्यं द्वितीयमपि चेद्गुरु तच्चतुर्थं—

यत्राष्टमं च दशमान्त्यमुपान्त्यमन्त्यम् ।
कामाङ्कुशाङ्कुशितकामिमतङ्गजेन्द्रे ?
कान्ते वसन्ततिलकां किल तां वदन्ति ॥३७॥

अन्वय—हे कामाङ्कुशाङ्कुशितकामिमतङ्गजेन्द्रे। यत्र चेत् आद्यं द्वितीयम्, तच्च तुर्यं अष्टमं दशमान्त्यं उपान्त्यं अन्त्यं(अक्षरं)गुरु(स्यात्) हे कान्ते किल तां वसन्ततिलकां वदन्ति ॥ ३७ ॥

अर्थः—कामः—मदन एवाङ्कुशस्तेनाङ्कुशिताः—वशीकृताःकामिनः—कामुका एव मतङ्गजेन्द्राः — दिग्गजा यथा तत्सम्बुद्धौ ! यत्र — यस्मिन् पद्ये, चेत् — यदि, आद्यं — प्रथमं द्वितीयं — द्वित्वसंख्याविशिष्टं, तत् — तथा चतुर्थं — तुर्यं अष्टमं, दशमान्त्यं — एकादशम्, उपान्त्यं — त्रयोदशं अन्त्यं — चतुर्दशञ्च(अक्षरं)गुरु — दीर्घं (स्यात्)। हेकान्ते-प्रिये किल — निश्चयेन तां — अमुम्, वसन्ततिलकां — तदाख्यां वृत्तिं, वदन्ति — ब्रुवन्ति । च. अ. १४, ग०,त, भ, ज,ज,गु, गु, ऽऽ।,ऽ।।,।ऽ।,।ऽ।,ऽ,ऽ, ॥ ३७ ॥

भाषा--हे कमिनि ! हे कांते ! जिस श्लोक में पहिला दूसरा, चौथा, आठवां, ग्यारहवां, तेरहवां और चौदहवां अक्षर दीर्घ हो उसको पण्डित लोग वसंत तिलका छन्द कहते हैं॥३७॥

मालिनी छन्दः ।

प्रथममगुरु षट्कं विद्यते यत्र कान्ते–
तदनु च दशमं चेदक्षरं द्वादशान्त्यम् ।
गिरिभिरथ तुरङ्गैर्यत्र कान्ते विरामः
सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा ॥ ३८ ॥

अन्वयः–हे कान्ते, यत्र प्रथमम्, षट्कम्, तदनु, दशमम् द्वादशान्त्यम् च अक्षरम् अगुरु चेत् विद्यते । हे कान्ते गिरिभिः अथ तुरङ्गैः यत्र विरामः सा सुकविजनमनोज्ञा मालिनी प्रसिद्धा ॥ ३८ ॥

अर्थः – हे कान्ते – प्रिये, यत्र – यस्मिन् छन्दसि, प्रथमं षट्कम् – पादेषु आदितः षडक्षरम्, तदनु – तदनन्तरं दशमं – तत्संख्याकं द्वादशान्त्यं – त्रयोदशञ्चाक्षरं – वर्णः चेत् – यदि अगुरु – लघु, विद्यते – भवति । हे कान्ते – प्रिये, गिरिभिः – अष्टभिः अथ – अनन्तरं तुरङ्गैः – सप्तभिः यत्र – यस्मिन पद्ये, विरामः – विश्रामः, सा – असौ, सुकविजनानां – शोभनविद्वज्जनानां मनोज्ञा–मनोहारिणी,

मालिनी–तदाख्या वृत्तिः, प्रसिद्धा–प्रथिता। च. अ. १५, ग. न, न, म, य, य, यतिः ८, ७, ।।।, ।।।, ऽऽऽ, ।ऽऽ, ।ऽऽ, ॥ ३८॥

भाषा–हे कान्ते! हे सुन्दरि! जिस श्लोक में पहिले के छः अक्षर तथा दशवां और तेरहवां अक्षर ह्रस्व हो और सात तथा आठ अक्षरों पर उत्तम कवियों को सुन्दर लगने वाले विराम हो, उसको मालिनी छन्द कहते हैं॥ ३८॥

हरिणी छन्दः।

सुमुखि लघवः पञ्च प्राच्यास्ततो–दशमान्तिकं
तदनु ललितालापे वर्णौ यदि त्रिचतुर्दशौ
प्रभवति पुनर्यत्रोपान्त्यः स्फुरत्करकङ्कणे यतिरपि
रसैर्वेदैरश्वैः स्मृता हरिणीति सा॥३९॥

अन्वयः–हे सुमुखि! यत्र प्राच्याः पञ्च (वर्णाः) लघवः (स्युः) ततः दशमान्तिकं, तदनु त्रिचतुर्दशौ वर्णौ (लघू) स्याताम्। हे ललितालापे! पुनः उपान्त्यः (वर्णः लघुः स्यात) हेस्फुरत्करकङ्कणे, रसैः वेदैः अश्वैः यतिः अपि (स्यात) सा हरिणीति स्मृता॥ ३९॥

अर्थः-सुष्ठु-शोभनं मुखमाननं यस्यास्तत्सम्बुद्धौ ! यत्र-वृत्तौ प्राच्याः-प्रथमे, पञ्च-पञ्च वर्णाः लघवः-ह्रस्वाः स्युः । ततः-तदनु, दशमान्तिक—एकादशं; तदनु-ततः, त्रिचतुर्दशौ-त्रयोदशचतुर्दशौ वर्णौ-अक्षरे (लघुनी) स्याताम् । ललितः—मनोहरः, आलापो—भाषणं यस्यास्तत्सम्बुद्धौ ! पुनः-भूयः, उपान्त्यः-अन्त्यसमीपस्थः [लघुःस्यात् । स्फुरन्ति-प्रकाशमानानि करयोः-हस्तयोः कङ्कणानि यस्यास्तत्सम्बुद्धौ हेस्फुरत्करकङ्कणे रसै-षड्भिः वेदैश्चतुर्भिः, अश्वैः-सप्तभिः यतिः-विश्रामः स्यात् । सा-असौ हरिणी-एतदाख्या वृत्तिः इति-इत्थं, स्मृता-कथिता। च. अ. १७ ग०, न, स, म, र, स, ल, गु, यतिः ६, ४, ७, ।।।, ।।ऽ, ऽऽऽ, ऽ।ऽ ।।ऽ,।,ऽ,।।३६।।

भाषा-हे सुन्दर मुखवाली ! हे मधुर भाषण करने वाली हे चमकते हुए सुवर्ण के कङ्कण वाली ! जिस श्लोक में आदिके पांच अक्षर, ग्यारहवां,तेरहवां,चौदहवां, और सोलहवां ये अक्षर ह्रस्व हों और ६, ४, ७, अक्षरों पर विराम हो उसे हरिणी छन्द कहते हैं ॥ ३९ ॥

यदा पूर्वौ ह्रस्वः कमलनयने षष्ठकपरा-
स्ततो वर्णाः पञ्च प्रकृतिसुकुमाराङ्गि लघवः ।

त्रयोन्ये चोपान्त्या सुतनु जघनाभोगसुभगे-
रसै रुद्रैर्यस्यां भवति विरतिः सा शिखरिणी ॥४०॥

अर्थः—हे कमलनयने ! यदा पूर्वः (वर्णः) ह्रस्वः (स्यात्) ततः षष्ठकपराः पञ्च वर्णाः लघवः (स्युः) हे प्रकृतिसुकुमाराङ्गि ! अन्ये च उपान्त्याः त्रयः (वर्णाः लघवः स्युः) हे सुतनु ! हे जघनाभोगसुभगे ! यस्यां रसैः रुद्रैः विरतिः भवति सा शिखरिणी (स्यात्) ॥ ४० ॥

अर्थः—कमले—पद्मे इव नयने—नेत्रे यस्यास्तत्सम्बुद्धौ यदा—यस्मिन् पद्ये, पूर्वः—प्रथमः वर्णः, ह्रस्वः—लघुः स्यात्, ततः—पश्चात्, षष्ठकपराः—षष्ठात्तरतोऽग्रे पञ्चवर्णाः—पञ्चाक्षराणि लघवः—ह्रस्वाः स्युः। प्रकृत्या—स्वभावेन सुकुमाराणि—कोमलानि अङ्गानि—शरीराणि यस्यास्तत्सम्बुद्धौ ! अन्ये—इतरे च उपान्त्या—अन्त्यसमीपस्थाः त्रयः—चतुर्दश पञ्चदशषोडशाश्च वर्णाः लघवः स्युः हे सुतनुहेजघनाभोग सुभगे ! जघनयोः आभोगेन—पृथुत्वेन सुभगा-सुशोभना, सुष्ठु तनुर्यस्याः तत्सम्बुद्धौ ! यस्यां—वृत्तौ रसैः—षड्भिः रुद्रैः—एकादशभिः विरतिः—यतिः भवति—जायते, सा-असौ, शिख-

रिणी–तदाख्या वृत्तिः स्यात् । च. अ० १७ ग० य, म, न, स, भ, ल, गु, यतिः ६, ११, ISS, SSS, III, IIS, SII, S, ॥ ४० ॥

भाषा–हे कमल के समान नेत्रवाली ! हे स्वभाव से कोमलांगि ! हे सुन्दर जंघावाली! हे सुन्दरि ! यदि आदि का अक्षर ह्रस्व हो और उसके बाद के ५ अक्षर दीर्घ हों तथा छठवें से आगे के पांच अक्षर और चौदहवां पंद्रहवां और सोलहवां ये अक्षर लघु हों और जिसमें ६ और ११ अक्षर पर विराम हो उसको शिखरिणी छन्द कहते हैं ॥ ४० ॥

पृथ्वी छन्दः ।

द्वितीयमलिकुन्तले यदि षडष्टमं द्वादशं–
चतुर्दशमथ प्रिये गुरु गभीरनाभिह्रदे ॥
सपञ्चदशमन्तिकं तदनु यत्र कान्ते यति–
र्गिरीन्द्रफणिभृत्कुलैर्भवति सुभ्रु पृथ्वी हि सा॥४१॥

अन्वयः–हे अलिकुन्तले ! यदि द्वितीयम् षडष्टमम् द्वादशम् अथ चतुर्दशम् तदनु सपञ्चदशम् अन्तिकं (अक्षरम्) गुरु (स्यात) हे प्रिये ! हे गभीरनाभिह्रदे ! हे कांते ! यत्र गिरीन्द्रफणिभृत

कुलैःयतिः भवति । हे सुभ्रु हि सा पृथ्वी—(ज्ञेया)॥४१॥

अर्थः—अलिवत्—भ्रमरवच्छ्यामाः कुन्तलाः—अलकाः—यस्यास्तत्सम्बुद्धौ ! यदि—चेत्,द्वितीयम्—तत्संख्याकमष्टमम्—षष्ठषष्ठमकं च, द्वादशं—तत्संख्याकं अथ—अन्यत् चतुर्दशम्, तदनु—तत्पश्चात् सपञ्चदशं—पञ्चदशसहितं अन्तिकं—सप्तदशं (अक्षरं) गुरु—दीर्घं स्यात् । हे प्रिये—वल्लभे ! हे कान्ते नायिके ! हे गभीरनाभिह्रदे ! गभीरं—गम्भीरं नाभिरेव ह्रदो यस्यास्तत्सम्बुद्धौ ! यत्र—यस्मिन् पद्ये गिरीन्द्रैः—अष्टभिः फणिभृत्कुलैः—नवभिश्च यतिः—विश्रामः भवति—जायते । हि—निश्चयेन,सा असौ,पृथ्वी—तदाख्या वृत्तिः, ज्ञेया । च. अ. १७, ग, ज,स. ज, स, य, ल, यति ८, ९, ।ऽ।,।।ऽ,।ऽ।,।।ऽ, ऽऽ,।, ॥ ४१ ॥

भाषा—हे भ्रमरों के समान श्याम केशवाली ! हे गंभीर नाभिवाली । यदि श्लोक का दूसरा, छठवां, आठवां, बारहवां चौदहवां, पंद्रहवां, और सत्रहवां, ये अक्षर दीर्घ हों और हे कामिनि ! हे सुन्दर भृकुटीवाली ! आठवें और नौवे अक्षरों पर विराम हो, उसे पृथ्वी छन्द कहते हैं ॥ ४१ ॥

शार्दूलविक्रीडितं छन्दः ।

आद्याश्चेद्गुरवस्त्रयः प्रियतमे षष्ठस्तथा चाष्टमो-

नन्वेकादश तस्त्रयस्तदनु चेदष्टादशाद्यौ ततः ।
मार्तण्डैर्मुनिभिश्च यत्र विरतिः पूर्णेन्दुबिम्बानने
तद्वृत्तं प्रवदन्ति काव्यरसिकाःशार्दूलविक्रीडितम् ४२

अन्वयः—हे प्रियतमे ! चेत् आद्याः त्रयः (वर्णाः) गुरवः (स्युः) षष्ठः तथा अष्टमः च (गुरुः) (स्यात्) चेत्, तदनु एकादशतः त्रयः ततः अष्टादशाद्यौ (वर्णौ) (इत्येते वर्णाः गुरवः स्युः) हे पूर्णेन्दुबिम्बानने यत्र मार्तण्डैः मुनिभिः च विरतिः (स्यात्) काव्यरसिकाः तद्वृत्तं शार्दूलविक्रीडितं प्रवदन्ति ॥ ४२ ॥

अर्थः—हे प्रियतमे-अतिशयेन प्रिये ! चेत्—यदि आद्याः—पूर्वे, त्रयः—प्रथमादित्रयः वर्णाः गुरवः—दीर्घाः स्युः । षष्ठः, तथा अष्टमश्च वर्णः गुरुः स्यात् । चेत्—यदि, तदनु—तत्पश्चात् एकादशतस्त्रयः—द्वादश त्रयोदश चतुर्दशाः ततः—तदनन्तरं अष्टादशाद्यौ—षोडशसप्तदशौ वर्णौ गुरवः स्युः । हे पूर्णेन्दुबिम्बानने, पुर्णश्चासौ विन्दुः पुर्णेन्दुस्तस्य बिम्बवदाननं—मुखं यस्यास्तत्सम्बुद्धौ । यत्र—यस्मिन् पद्ये, मार्तण्डैः-द्वादशभिः, मुनि

भिः — सप्तभिश्च विरतिः — विरामः स्यात्तर्हि काव्य रसिकाः — कविवराः, तद्वृत्तं — तत् छन्दः, शार्दूलविक्रीडितं — एतन्नामकं प्रवदन्ति — कथयन्ति । च; अ; १६ ग० म, स, ज, स, त, त, गु; यतिः १२, ७, SSS, ॥S, ।S।, ॥S, SS।, SS।, S, ॥ ४२ ॥

भाषा--हे प्राणप्यारी ! जिसमें आदि के तीन अक्षर तथा छठवां और आठवां तथा एकादश से ३ अर्थात् १२,१३,१४, वा तथा अठारह के आदि के २ अर्थात् १६, १७ वां और अन्त का १९ वां ये अक्षर गुरु हों और हे चंद्रमुखि ! जिसमें १२ और ७ अक्षरों पर विराम हो तो काव्य के रसिक उसको शार्दूलविक्रीडितछन्द कहते हैं ॥ ४२ ॥

स्रग्धरावृत्तम् ।

चत्वारो यत्र वर्णाः प्रथममलघवः
षष्ठकः सप्तमोऽपि ।
द्वौ तद्वत्षोडशाद्यौ मृगमदमुदिते
षोडशान्त्यौ तथान्त्यौ ।
रंभास्तम्भोरुकान्ते मुनिमुनिमुनिभि-
र्दृश्यते चेद्विरामो ।
बाले वन्द्यैः कवीन्द्रैः सुतनु निगदिता
स्रग्धरा सा प्रसिद्धा ॥ ४३ ॥

अन्वयः—हे मृगमदमुदिते । यत्र प्रथमं चत्वारः वर्णाः अलघवः षष्ठकः सप्तमः अपि (अलघुः) तद्वत् हे रम्भास्तम्भोरुकान्ते ! षोडशा-

द्वौ द्वौ षोडशान्त्यौ तथा अन्त्यौ (अलघू) चेत् हे बाले मुनि मुनि मुनिभिः विरामः दृश्यते,हे सुतनु, वन्द्यैः कवीन्द्रैः सा प्रसिद्धा स्रग्धरा निगदिता ॥ ४३ ॥

अर्थः—मृगस्य मदेन – कस्तूर्या मुदिते – सन्तुष्टे, यत्र-यस्यां वृत्तौ, प्रथमं – पूर्वं, चत्वारो वर्णाः-चत्वार्यं क्षराणि, अलघवः – गुरवः (स्युः) षष्ठकः-षष्ठः, सप्तमोऽपि (अलघुः) तद्वत् – तथैव, हे रम्भास्तम्भोरुकान्ते । रम्भायाः – कदल्यास्तम्भवदुर्वोः कान्तिर्यस्यास्तथाभूते । षोडशाद्यौ द्वौ-चतुर्दशपञ्चदशौ, षोडशान्त्यौ – सप्तदशाष्टादशौ वर्णौ, तथा – तेन प्रकारेण, अन्त्यौ – विंशैकविंशौ गुरू स्याताम्। चेत्—यदि,हे बाले मुनि मुनि २ भिः – सप्तभि, सप्तभिः विरामः – विश्रामः, दृश्यते – ज्ञायते हे सुतनु – सुगात्रि । वन्द्यैः – पूजार्हैः, कवीन्द्रैः-कविवरैः सा प्रसिद्धा – प्रथिता, स्रग्धरा – एतदाख्या वृत्तिः, निगता – कथिता । च० अ० २१, ग० म,र,भ,न,य, य,य, यतिः ७, ७, ७, SSS,SIS,SII,III,ISS,ISS,ISS,॥ ४३ ॥

भाषा – हे कस्तूरी से खुश होने वाली ! जिसमें आदि के ४ अक्षर गुरु हों तथा ६,७,१४,१५,१७,१८,२०,२१, ये अक्षर भी दीर्घ हों और हे केले के खंभ के समान सुन्दर जंघावाली ! जिस मे ७ । ७ । वर्णों पर विराम होता, हे बाले ! हे सुन्दरि ! उसको कवीश्वरों ने स्रग्धरा नामक छन्द कहा है ॥ ४३ ॥

परिशिष्टम् ।

वाक्यं रसात्मकं काव्यम्

गद्यपद्यभेदेन तद्द्विविधम् ।

छन्दोबद्धं पद्यं तदेव वृत्तशब्देन व्यवह्रीयते; तद्रहितं तु गद्यम्, मिश्रं चम्पू भवति ।

अर्थः... पद छन्द में होने से पद्य कहलाता है, और तद्रहित होने से गद्य होता है, जैसे रामयणादि, और कादम्बार्यादि, गद्य और पद्य एक में होने से चम्पू होता है जैसे भारत चम्पू आदि ।

समार्धसमविषमभेदेन वृत्तं त्रिविधम् ।

अर्थ,...सामः अर्धसम और विषम इस भेदसे वृत्ततीन प्रकारका है ।

समार्द्धसमविषमवृत्तानां लक्षणानि ॥

अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः । तच्छन्दःशास्त्रतत्वज्ञाः समं वृत्तं प्रचक्षते ॥ १ ॥ प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत् द्वितीयस्तुर्यवद्वृत्तं तदर्द्धसममुच्यते ॥ २ ॥ यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् । तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ॥ ३ ॥

भाषा—जिसके चारों चरणों में समान लक्षण हो उसको छन्दः शास्त्र के ज्ञाता समवृत्त कहते हैं ॥ १ ॥ जिसका प्रथम चरण और तीसरा चरण तथा दूसरा और चतुर्थ चरण तुल्य हो उसे अर्ध सम कहते हैं ॥२॥ जिसके चारो चरण आपस में भिन्न२ लक्षण के हों उसे छन्दों के ज्ञाता लोग विषमवृत्त कहते हैं ॥३॥

गणलक्षणम् ।

मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः जो गुरुमध्यगतो रल मध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः॥१॥ गुरुरेको गकारस्तु लकारो लघुरेककः । क्रमेण चैषां रेखाभिः संस्थानं दृश्यते यथा ॥ २ ॥

भाषा—मगण में ३ गुरु हैं जैसे ३ऽऽऽ, नगण में ३ लघु हैं जैसे ।।।, भगण के आदि में गुरु है जैसे ऽ।।, यगण के आदि में लघु है जैसे ।ऽऽ, जगण के मध्य में गुरु है जैसे ।ऽ।, रगण के मध्य में लघु है जैसे ऽ।ऽ, सगण के अन्त्य में गुरु हैं जैसे ।।ऽ, तगण के अन्त्य में लघु है जैसे ऽऽ, । इस प्रकार छन्दशास्त्र में तीन २ वर्णों के आठ गण हैं, गकार का एक गुरु, वर्ण है जैसे ऽ, लकार का एक लघु वर्ण है जैसे ।; ॥

प्रस्तारज्ञानम् ।

पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः
यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम्

ऊने दद्यात् गुरूनेवं यावत्सर्वलघुर्भवेत्
प्रस्तारोऽयं समाख्यातश्छन्दोविच्छित्तिवेदिभिः

अर्थः—छन्द के जितने अक्षर हों उतने गुरु बनाकर प्रथम रक्खे, और पहिले गुरु के नीचे लघु रख कर बांकी ऊपर जैसा हो वैसे ही नीचे रखता जाय, और उन स्थान में गुरु रक्खे यही क्रिया बार बार करे, जब तक सब लघु न हो जावे, छन्दः शास्त्रज्ञ लोगों ने इस को प्रस्तार कहा है। (इसके करने से एक छन्द के अनेक भेद निकलते हैं)

त्र्यक्षर प्रस्तार का यह उदाहरण है।

SSS	मगणः
ISS	यगणः
SIS	रगणः
IIS	सगणः
SSI	तगणः
ISI	जगणः
SII	भगणः
III	नगणः

गणनाम देवताफलानि ५

मो भूमिः श्रियमातनोति य जलं वृद्धिं र वन्हिर्मृ तिम्। सो वायुः परदेशदूरगमनं त व्योम शून्यं फलम्। जः सूर्यो भयमाददाति विपुलं भेन्दुर्यशो निर्मलं नो नाकश्च सुखप्रदः फलमिदं प्राहुर्गणानां बुधाः।

भाषा मगण की देवता भूमि है, वह लक्ष्मी का विस्तार करती है यगण की देवता जल, वह वृद्धिकर्ता है, रगण की देवता अग्नि है, वह मृत्यु देती है। सगण की देवता वायु है, वह परदेश गमन कराता है, तगण की देवता आकाश है, इसका फल शुन्य है। जगण की देवता सूर्य है वह रोग देता है। भगण की देवता चन्द्रमा है, वह निर्मल भय देता है। नगण की देवता स्वर्ग है, वह सुख देता है इस प्रकार पंडितोंने गणों का फल वर्णन किया है जैसा निम्न लिखित चक्र से ज्ञात होगा।

संख्या	गणनाम	देवता	फल	स्वरूप
१	मगण	भूमि	लक्ष्मीलाभ	SSS
२	यगण	वरुण	प्रारब्धोदय	I SS
३	रगण	अग्नि	मृत्यु	S I S
४	सगण	वायु	विदेशगमन	II S
५	तगण	आकाश	निष्फलता वा राज्यलाभ	SSI
६	जगण	सूर्य	भय	I S I
७	भगण	चन्द्र	कीर्तिलाभ	SII
८	नगण	स्वर्ग	सुख तथा स्वर्गलाभ	III

अथ छंदोऽभ्यास विधिः।

कविशिक्षा शतं वीक्ष्य कवीन्द्रान् उपजीव्य च।
कथ्यते केऽपि शब्दा यैश्छन्दो मन्दोऽपि विन्दति॥१॥

भाषा—कवि लोगों के शिक्षाओं को देखकर और कवि लोगों की सेवा कर कुछ शब्दों को कहता हूँ जिस से मन्द मनुष्य छन्दों का अभ्यास सुगम रीति से कर सकते हैं।

श्रीर्लक्ष्मीः कमला पद्मालया च हरिवल्लभा।
दुग्धाब्धिनन्दिनी क्षीरसागरापत्य मेयपि॥२॥
क्षीरपाथोधितनयेत्येवमेकाक्षरादिकम्।
आदौ साध्यं पदं स्थाप्यं शेषं कुर्याद्विशेषणम्॥३॥

भाषा—लक्ष्मी के एकाक्षर से, आठ अक्षर तक ये नाम हैं, छन्द का अभ्यास करने में पहिले जिसका वर्णन करना हो उसको रक्खे पश्चात् उसको विशेषणों से युक्त करे—

विशेष्योऽर्थो वर्णाकाराधाराधेयक्रियागुणैः।
सादृश्यपरिवाराद्यैः क्रियते सविशेषणैः॥४॥

भाषा—विशेष्य अर्थ वर्ण, आकार, आधार, आधेय, क्रिया, गुण, सादृश्य इत्यादिक से युक्त करना चाहिये।

१ यथा सुधांशुर्धवलोऽतिवृत्तः
क्रान्तान्वरोक्षो हरिणं दधानः ।
महत्तमो घ्नन् जनतापहारो
मृगेन्द्रवद्राजति ऋक्षमध्ये ॥

कथानगरसर्वार्थं नित्यकृत्यादि वर्णनैः ।
लोकानां दृष्टचेष्टाभिश्छन्दाभ्यासक्रमो यथा॥
आसीत् दशरथो राजा चत्वारस्तस्य सूनवः ।
रामलक्ष्मणशत्रुघ्नभरता इति विश्रुताः ॥
ध्वस्तध्वान्तभरं रत्नवेश्मविस्मेररश्मिभि ।
राजधानी दिनस्येव तत्पुरं द्योतते सदा ॥
स्थाली भात्यन्नपूर्णेयमम्भोभिः शोभते घटः ।
पटः संलक्ष्यते सूक्ष्मः साक्षाल्लक्ष्मीरियं वधूः ॥

१ इस श्लोक में 'सुधांशुको' विशेष्य कर बाकी सब उसके विशेषण किये हैं ॥

प्रातः कृतश्रमः स्नातोऽर्च्चितदेवो हुतानलः ।
भुक्तान्नः श्रुतसच्छास्त्रः सायं शय्यागृहं ययौ ॥
पुष्पाणि पाणिदेशेऽसौ कृत्वा क्रीडति कामुकः।
ताम्बुलिकोऽत्र ताम्बुलमस्य पश्यार्पयत्यसौ ॥

इस प्रकार छन्दों का अभ्यास करने से मनुष्य शीघ्रही कवि कि हो सकता है,

श्रुतबोधे प्रश्नाः

(१) पृथ्वीहरिण्योः कस्मिन्विषये भेदः; कस्मिंश्चाभेद इति सलक्षणमुत्तरणीयम् ।
(२) लक्ष्यन्तामुदाह्रियन्तां चाधोविन्यस्तछन्दांसि; शालिनी-मन्दाक्रान्ता-शिखरिणी-स्रग्धरा-उपेन्द्रवज्रा-इन्द्रवंशेति ।
(३) यस्मिन्वृत्ते आद्यास्त्रयः अष्टमः दशमः द्वादशत्रयोदशौ च गुरवः सन्ति तस्य किं नाम ।
(४) मणिबन्धस्यादावन्ते एकगुरुयोजने किं छन्दो भवति ।
(५) अधोलिखितानां पादानां यस्मिन्समावेशस्तस्य किं नाम।
कनककुण्डलमण्डितगण्डया ॥ १ ॥
द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः ॥ २ ॥
कथमयमपि कालश्चारुचन्द्रावतंसः ॥ ३ ॥
सस्तादम्बुमदम्बुदालिगलरुग्देवो मुदे वो मृडः ॥४॥
(६) यस्मिन् प्रथमे पंच वर्णाः तथा एकादशत्रयोदशचतुर्दश षोडशाश्च वर्णाः लघवः सन्ति तत्किन्नामकं छन्दः ।
(७) गणानां नामानि कानि; कानि च तेषां फलानि ।
(८) श्रुतबोध इति नाम अन्वर्थमनन्वर्थम्वेति सयुक्तिकं लिख ।
(९) पादान्तस्थं विकल्पेनेत्यस्योदाहरणं लिख ।
(१०) अस्य ग्रन्थस्य कर्ता कः कथं तन्निर्णय इति लिख ।

इति

बाबू काशीप्रसाद भार्गव द्वारा—
भार्गवभूषण प्रेस, काशी में मुद्रित ।